# Shri Ganesha Stuti Prajapatikrita

# પ્રજાપતિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Prajapatikrita

File name : gaNeshastutiHprajApatikRRitA.itx

Category : ganesha, mudgalapurANa, stuti, ekAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 5 | 2.5 6-24||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# પ્રજાપતિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
પ્રજાપતય ઊચુઃ ।
નમસ્તે વિઘ્નનાથાય નમસ્તે સર્વસાક્ષિણે ।
સર્વાત્મને સ્વસંવેદ્યરૂપિણે તે નમો નમઃ ॥ ૬॥
યોગાય જગતાં પાત્રે બ્રહ્મદાત્રે નમો નમઃ ।
યોગિનાં ગમ્યરૂપાય શાન્તિયોગપ્રદાય તે ॥ ૭॥
સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે નાનારૂપધરાય તે ।
અવ્યક્તાય વ્યક્તકાય વ્યક્તાવ્યક્તાય તે નમઃ ॥ ૮॥
બ્રહ્મણે વિષ્ણવે ચૈવ શઙ્કરાય ચ ભાનવે ।
શક્તયે ચન્દ્રરૂપાય યમાય ચ નમો નમઃ ॥ ૯॥
અગ્નયે નૈરૃતાયૈવ વારુણાય ચ વાયવે ।
કુબેરાય ચ રુદ્રાય શેષાય ચ નમો નમઃ ॥ ૧૦॥
ગ્રહનક્ષત્રરૂપાય સિદ્ધસાધ્યમયાય ચ ।
પશવે નરરૂપાય વૃક્ષાકારાય તે નમઃ ॥ ૧૧॥
પર્વતાય સમુદ્રાય નદીનદસુરૂપિણે ।
દૈત્યાય દૈત્યનાથાય રાક્ષસાય નમો નમઃ ॥ ૧૨॥
અન્નાય ફલરૂપાય રસરૂપાય તે નમઃ ।
પઞ્ચભૂતમયાયૈવ સર્વાકારાય તે નમઃ ॥ ૧૩॥
ચિદ્રૂપાય ચ બોધાય વિદેહાય નમો નમઃ ।
અસત્યાય ચ સત્યાય સમરૂપાય સાધયે ॥ ૧૪॥
સ્વાનન્દાય હ્યયોગાય યોગાય ગણધારિણે ।
ગણેશાય નમસ્તુભ્યં સર્વશાન્તિપ્રદાય ચ ॥ ૧૫॥
ચિન્તામણિં ત્વાં કઃ સ્તોતું સમર્થઃ સ્યાત્પ્રકાશકમ્ ।
ચિત્તસ્ય ચિત્તવૃત્તીનામતસ્ત્વાં પ્રણમામહે ॥ ૧૬॥
(ફલશ્રુતિઃ)

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશં તં પ્રણતાસ્તે પ્રજાપતે ।
તાનુવાચ ગણાધીશો વૃણુધ્વં વિવિધાન્ વરાન્ ॥ ૧૭॥
ભવદ્ભિર્યત્ કૃતં સ્તોત્રં મમ માન્યં ભવિષ્યતિ ।
યઃ પઠિષ્યતિ ભાવેન શ્રોષ્યતે સર્વસિદ્ધિદમ્ ॥ ૧૮॥
પુત્રપૌત્રકલત્રાદિપ્રદં તેભ્યો ભવિષ્યતિ ।
વન્ધ્યદોષહરં ધાન્યધનદં પશુદં પરમ્ ॥ ૧૯॥
ભુક્તિમુક્તિપ્રદં સ્તોત્રં બ્રહ્મભૂયકરમ્ભવેત્ ।
મનઈપ્સિતદં પુણ્યં નરાણાં નાત્ર સંશયઃ ॥ ૨૦॥
ગણેશવચનં શ્રુત્વા ત એવં હર્ષસંયુતાઃ ।
તં પ્રણમ્ય મહાભક્ત્યા ઊચુઃ પ્રાઞ્જલયોઽભવન્ ॥ ૨૧॥
ત ઊચુઃ ।
યદિ પ્રસન્નતાં યાતસ્તદા દેહિ ગજાનન ।
ત્વદીયામચલાં ભક્તિં યયા મોહો વિનશ્યતિ ॥ ૨૨॥
સામર્થ્યમતુલં સૃષ્ટેર્દેહિ નો વિઘ્નનાયક ।
યદ્યદિચ્છામહે ઢુણ્ઢે તત્તત્ સિધ્યતુ સર્વદા ॥ ૨૩॥
ઓમિત્યુક્ત્વા ગણાધીશોન્તર્ધાનં પ્રચકાર વૈ ।
તેઽપિ તં મનસા ધ્યાત્વા યયુઃ સ્વસ્વપદં તતઃ ॥ ૨૪॥

ઇતિ પ્રજાપતિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥
એકાદશસ્તોત્રં
- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૫ । ૨.૫ ૬-૨૪॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 5 . 2.5 6-24..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Prajapatikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*